FREE SAMPLE | Buy the complete pack at notesbazar.in | page 1 of 6

कक्षा 8 · संस्कृतम् · दीपकम् (NCERT)

# दशमः पाठः
# सन्निमित्ते वरं त्यागः (क-भागः)



हितोपदेशात् · राजा शूद्रकः, राजपुत्रः वीरवरः · राजलक्ष्मीः · वाक्यान्वयः, भूतकालः

## पाठ-परिचयः

संस्कृतवाङ्मये कथासाहित्यस्य विशिष्टं स्थानम्। कथाभिः मनोरञ्जकतया जीवनोपदेशाः प्रेरणाः च दीयन्ते। प्रस्तुतः पाठः '**हितोपदेशः**' इति कथाग्रन्थात् स्वीकृतः। राज्ञः **शूद्रकस्य** सेवायां नियुक्तस्य **वीरवर**नामकस्य कर्तव्यनिष्ठस्य राजपुत्रस्य वर्णनम् अत्र। सः राज्ञः राष्ट्रस्य च रक्षणाय स्वप्राणान् अपि अर्पयितुम् उद्यतः। पाठः भागद्वये: क-भागे (पाठ 10) वृत्तिप्राप्तिः राजलक्ष्मीदर्शनं च; ख-भागे (पाठ 11) त्यागः।

★ **परीक्षा-सुझाव: हिंदी में सार:** शोभावती नगरी में महापराक्रमी, अनेक शास्त्रों के ज्ञाता, पवित्र चरित्र वाले राजा शूद्रक रहते थे। एक दिन वीरवर नामक राजपुत्र आजीविका के लिए पत्नी वेदरता, पुत्र शक्तिधर और कन्या वीरवती के साथ राजद्वार पर आया। राजा ने वेतन पूछा: 'प्रतिदिन 400 स्वर्णमुद्राएँ'; सामग्री: 'ये दो भुजाएँ और यह तलवार'। राजा: 'यह सम्भव नहीं'। मन्त्री की सलाह पर चार दिन का वेतन देकर परीक्षा हेतु पान (ताम्बूल) देकर नियुक्त किया। वीरवर वेतन का आधा देवताओं को, शेष का आधा दरिद्रों को देता, बाकी पत्नी को भोजन-व्यय हेतु; और शस्त्र लेकर दिन-रात राजद्वार की सेवा करता। कृष्ण चतुर्दशी की आधी रात राजा ने करुण रोदन सुना; वीरवर को भेजा और स्वयं तलवार लेकर छिपकर पीछे गए। नगर के बाहर दिव्य आभूषणों वाली रोती सुन्दरी मिली: 'मैं शूद्रक की राजलक्ष्मी हूँ; देवी के अपराध से तीसरे दिन राजा की मृत्यु होगी।' उपाय: 'यदि तुम अपनी सबसे प्रिय वस्तु हँसते मुख से भगवती सर्वमङ्गला को उपहार दो, तो राजा सौ वर्ष जिएगा।' यह कहकर वह अदृश्य हो गई।

## परीक्षा-दृष्टि से महत्त्वपूर्ण ★★★

- ➤ स्रोत: हितोपदेशः (नारायण पण्डित)
- ➤ पात्र: शूद्रकः (राजा), वीरवरः (राजपुत्र), वेदरता (पत्नी), शक्तिधरः (पुत्र), वीरवती (कन्या), राजलक्ष्मीः, सर्वमङ्गला (देवी)
- ➤ वेतन: सुवर्णशतचतुष्टयम् (400) · सामग्री: बाहू + खड्गः
- ➤ वेतन-विभाग: ½ देवेभ्यः, ¼ दरिद्रेभ्यः, ¼ पत्न्यै
- ➤ व्याकरण: मुक्त पदविन्यास (वाक्यान्वय); भूतकाल: लङ्, लट् + स्म, क्तवतु, क्त

## भूतकाल के चार रूप (अत्र इदम् अवधेयम्) ★★

| विधिः | पाठात् उदाहरणम् |
|---|---|
| लङ् लकारः | उपागच्छत् (उप+अगच्छत्), अनयत्, व्यचिन्तयत् (वि+अचिन्तयत्) |
| लट् + स्म | प्रतिवसति स्म |
| क्तवतु (कर्तृवाच्य) | श्रुतवान् |
| क्त (कर्तृ/कर्म/भाव) | निर्गतः, नियोजितः, आलोकिता |

**वाक्यान्वयः:** संस्कृत में पदक्रम मुक्त है: रामः वनम् अगच्छत् = अगच्छत् रामः वनम् = वनम् अगच्छत् रामः। पाठ में: 'आसीत् शोभावती नाम काचन नगरी' → सामान्य क्रम 'शोभावती नाम काचन नगरी आसीत्'। अन्वय करते समय विभक्ति देखकर कर्ता, कर्म, क्रिया पहचानें।

SAMPLE · notesbazar.in

## 10.1 मूलपाठः, हिंदी अनुवादः ★★★

**अंश 1** आसीत् शोभावती नाम काचन नगरी। तत्र शूद्रको नाम महापराक्रमी नानाशास्त्रवित् पूतचरित्रः महीपतिः प्रतिवसति स्म। अथैकदा वीरवरनामा राजपुत्रः वृत्त्यर्थं कस्मादपि देशाद् राजद्वारमुपागच्छत्। तेन सह वेदरता नाम तस्य पत्नी, शक्तिधरो नाम सुतः, वीरवती नाम कन्या च समायाताः।

> **अनुवादः** शोभावती नाम की एक नगरी थी। वहाँ शूद्रक नाम का महापराक्रमी, अनेक शास्त्रों का ज्ञाता, पवित्र चरित्र वाला राजा रहता था। एक दिन वीरवर नाम का राजपुत्र आजीविका के लिए किसी देश से राजद्वार पर आया। उसके साथ वेदरता नाम की उसकी पत्नी, शक्तिधर नाम का पुत्र और वीरवती नाम की कन्या भी आए।

**अंश 2 वीरवरः** – (प्रतिहारं वीक्ष्य) भोः प्रतिहार! वृत्त्यर्थमागतो राजपुत्रोऽस्मि, तस्मान्नय मां स्वामिनः समीपम्। (ततो दौवारिकः तं प्रभोः समीपम् अनयत्।) **वीरवरः** – देव! यदि सौभाग्येन अहं भवतः सेवायां नियोजितः तर्हि यदादिश्यते तत् श्रद्धया पालयिष्यामि। **राजा** – किं ते वर्तनम्? **वीरवरः** – प्रतिदिनं सुवर्णशतचतुष्टयं देव! **राजा** – का ते सामग्री? **वीरवरः** – इमौ बाहू, एष खड्गश्च। **राजा** – नैतच्छक्यम्! (तत् श्रुत्वा वीरवरः राजानं प्रणम्य राजसभातः निर्गतः।)

> **अनुवादः वीरवरः** (द्वारपाल को देखकर) हे द्वारपाल! मैं आजीविका के लिए आया राजपुत्र हूँ, अतः मुझे स्वामी के पास ले चलो। (द्वारपाल उसे राजा के पास ले गया।) **वीरवरः** देव! यदि सौभाग्य से मैं आपकी सेवा में नियुक्त हुआ तो जो आदेश होगा उसे श्रद्धा से पालन करूँगा। **राजाः** तुम्हारा वेतन क्या है? **वीरवरः** प्रतिदिन चार सौ स्वर्णमुद्राएँ, देव! **राजाः** तुम्हारी सामग्री (साधन) क्या है? **वीरवरः** ये दो भुजाएँ और यह तलवार। **राजाः** यह सम्भव नहीं! (यह सुनकर वीरवर राजा को प्रणाम कर सभा से निकल गया।)

**अंश 3 मन्त्री** – देव! दिनचतुष्टयस्य वेतनार्पणेन प्रथमं परीक्ष्यतां स्वरूपमस्य वेतनार्थिनो राजपुत्रस्य, किमुपपन्नमेतत् वेतनं न वेति। अथ मन्त्रिणां वचनात् ताम्बूलदानेन नियोजितोऽसौ राजपुत्रो वीरवरो नरपतिना। स च राजपुत्रः प्रतिदिनं प्रभाते राजदर्शनादनन्तरं स्ववेतनस्य यच्छति देवेभ्यः अर्धम्। स्थितस्य चार्द्धं दरिद्रेभ्यो ददाति, निक्षिपति च तदवशिष्टं भोज्यविलासव्ययार्थं पत्न्याः हस्ते। ततो धृतायुधः सः राजद्वारमहर्निशं सेवते। यदा राजा स्वयमादिशति तदा याति स्वगृहम्।

> **अनुवादः मन्त्रीः** देव! चार दिन का वेतन देकर पहले इस वेतनार्थी राजपुत्र का स्वरूप परखा जाए कि यह वेतन उचित है या नहीं। तब मन्त्रियों के कहने पर राजा ने पान देकर वीरवर को नियुक्त किया। वह राजपुत्र प्रतिदिन सुबह राजदर्शन के बाद अपने वेतन का आधा देवताओं को देता, शेष का आधा दरिद्रों को देता, और बचा हुआ भोजन-व्यय के लिए पत्नी के हाथ में रख देता। फिर शस्त्र धारण कर दिन-रात राजद्वार की सेवा करता। जब राजा स्वयं आदेश देते तभी अपने घर जाता।

**अंश 4** अथैकदा कृष्णचतुर्दश्यामर्द्धरात्रे स राजा श्रुतवान् करुणरोदनध्वनिं कञ्चन। **राजा** – कोऽत्र द्वारि तिष्ठति? **वीरवरः** – सेवको वीरवरोऽत्र द्वारि वर्त्ते देव! **राजा** – क्रन्दनमनुसर राजपुत्र! **वीरवरः** – यथादिशति देवः। (ततोऽसौ तद्रोदनस्वरम् अनुसरन् प्रचलितः।) **राजा** – (स्वगतम्) नैष गन्तुमर्हति राजपुत्र एकाकी सूचिभेद्ये तिमिरेऽस्मिन्। तस्मात् अहमपि गच्छामि पृष्ठतोऽस्य, निरूपयामि च किमेतदिति। (ततो नरपतिः खड्गपाणिः तस्य अनुसरणक्रमेण बहिः निरगच्छत् नगरीद्वारात्। अथ गच्छता राजपुत्रेण बहिः नगरादालोकिता रोदनपरा कापि सुन्दरी दिव्याभरणभूषिता।)

> **अनुवादः** एक दिन कृष्ण चतुर्दशी की आधी रात को राजा ने किसी का करुण रोदन सुना। **राजाः** यहाँ द्वार पर कौन है? **वीरवरः** सेवक वीरवर यहाँ द्वार पर है, देव! **राजाः** राजपुत्र! रोने की आवाज़ का पीछा करो। **वीरवरः** जैसी देव की आज्ञा। (वह रोने के स्वर के पीछे चल पड़ा।) **राजाः** (मन में) इस घने (सुई से भेदने योग्य) अँधेरे में राजपुत्र का अकेले जाना उचित नहीं; अतः मैं भी इसके पीछे जाता हूँ और देखता हूँ कि यह क्या है। (तब राजा हाथ में तलवार लेकर उसके पीछे-पीछे नगर-द्वार से बाहर निकले। जाते हुए राजपुत्र ने नगर के बाहर दिव्य आभूषणों से सजी, रोती हुई एक सुन्दरी देखी।)

**अंश 5 वीरवरः** – का त्वमम्ब! किमर्थं विलपसि? **राजलक्ष्मीः** – वत्स! अहमेतस्य भूपालस्य शूद्रकस्य राजलक्ष्मीरस्मि। चिरमेतस्य भुजच्छायायां सुमहता सुखेन निवसामि। साम्प्रतं तु देव्या अपराधेनाद्य प्रभृति तृतीये दिवसे राजा पञ्चत्वं यास्यति, तदाहमनाथा भविष्यामि। तदिदानीं नात्र स्थास्यामीति क्रन्दामि। **वीरवरः** – भगवति! अस्त्यत्र कश्चिदुपायो येन भगवत्याः पुनरिह चिरवासो भवति, सुचिरं जीवति च स्वामी? **राजलक्ष्मीः** – अस्ति वत्स! एकैवात्र प्रवृत्तिः, सा चातीव दुःसाध्या। ... श्रूयतां पुत्र! यदि त्वया स्वस्य सर्वतः प्रियं वस्तु सहासवदनेन भगवत्यै सर्वमङ्गलायै उपहारः क्रियेत, तदा पुनर्जीविष्यति राजा शूद्रको वर्षाणां शतम्, अहञ्च सुखेन निवत्स्यामि। (ततः सा तत्क्षणादेव गताऽदृश्यतां तत्सम्मुखात्।)

> **अनुवाद: वीरवर:** माँ! तुम कौन हो? क्यों विलाप कर रही हो? **राजलक्ष्मी:** वत्स! मैं इस राजा शूद्रक की राजलक्ष्मी हूँ। बहुत समय से इसकी भुजाओं की छाया में बड़े सुख से रहती हूँ। परन्तु अब देवी के अपराध से आज से तीसरे दिन राजा की मृत्यु होगी; तब मैं अनाथ हो जाऊँगी। इसलिए अब यहाँ नहीं रहूँगी, यह सोचकर रो रही हूँ। **वीरवर:** भगवती! क्या कोई उपाय है जिससे आपका यहाँ फिर लम्बा निवास हो और स्वामी लम्बे समय तक जिएँ? **राजलक्ष्मी:** है वत्स! एक ही उपाय है, और वह अत्यन्त कठिन है। ... सुनो पुत्र! यदि तुम अपनी सबसे प्रिय वस्तु हँसते मुख से भगवती सर्वमङ्गला को उपहार में दो, तो राजा शूद्रक फिर सौ वर्ष जिएगा और मैं सुख से रहूँगी। (यह कहकर वह उसी क्षण उसके सामने से अदृश्य हो गई।)

## शब्दार्थाः ★★

| शब्दः | संस्कृतार्थः | हिंदी |
|---|---|---|
| महीपतिः | भूपालः | राजा |
| नानाशास्त्रवित् | अनेकशास्त्राणां ज्ञाता | अनेक शास्त्रों का ज्ञाता |
| पूतचरित्रः | पवित्रं चरित्रं यस्य | पवित्र चरित्र वाला |
| वृत्त्यर्थम् | आजीविकां प्राप्तुम् | आजीविका के लिए |
| प्रतिहारः / दौवारिकः | द्वारपालः | द्वारपाल |
| वर्तनम् | वेतनम् | वेतन |
| सुवर्णशतचतुष्टयम् | चतुश्शतसंख्यकाः स्वर्णमुद्राः | 400 स्वर्णमुद्राएँ |
| उपपन्नम् | उपयुक्तम् | उचित |
| धृतायुधः | शस्त्रयुक्तः | शस्त्रधारी |
| अहर्निशम् | दिवसः रात्रिः च | दिन-रात |
| सूचिभेद्ये | गहने | घने |
| तिमिरे | अन्धकारे | अँधेरे में |
| निरूपयामि | पश्यामि | देखता हूँ |
| खड्गपाणिः | खड्गवान् | हाथ में तलवार लिए |
| रोदनपरा | रोदनं कुर्वती | रोती हुई |
| साष्टाङ्गम् | अष्टभिः अङ्गैः सह | आठों अंगों सहित |
| पञ्चत्वम् | मृत्युम् | मृत्यु |
| अनाथा | स्वामिनं विना | बिना स्वामी के |
| प्रवृत्तिः | आचरणम् | उपाय/आचरण |
| दुःसाध्या | काठिन्येन अनुपालनीया | कठिन |
| सहासवदनेन | हास्ययुक्तमुखेन | हँसते मुख से |
| निवत्स्यामि | वासं करिष्यामि | रहूँगी |
| तत्क्षणादेव | तत्कालम् | उसी क्षण |

SAMPLE notesbazar.in

# NCERT अभ्यासः, पूर्णतः हलः

## 1. 'आम्' अथवा 'न' लिखत।

**उत्तर:** (क) वीरवरः राजपुत्रः आसीत्? **आम्** (ख) 'किं ते वर्तनम्?' इति शूद्रकः अपृच्छत्? **आम्** (ग) वीरवरं राज्ञः समीपे दौवारिकः अनयत्? **आम्** (घ) शूद्रकः वीरवरं साक्षात् दृष्ट्वा एव वृत्तिम् अयच्छत्? **न** (मन्त्रिणां वचनात्) (ङ) वीरवरः स्ववेतनस्य चतुर्थं भागम् एव पत्न्यै यच्छति स्म? **आम्** (½ देवेभ्यः, ¼ दरिद्रेभ्यः, शेषः ¼) (च) करुणरोदनध्वनिं राजा श्रुतवान्? **आम्** (छ) करुणरोदनध्वनिः दिवसे श्रुतः? **न** (अर्धरात्रे) (ज) राजलक्ष्म्या उक्तः उपायः अतीव दुःसाध्यः आसीत्? **आम्** (झ) भगवती सर्वमङ्गला उपायं संसूच्य अदृश्या अभवत्? **न** (राजलक्ष्मीः अदृश्या अभवत्)

## 2. पूर्णवाक्येन उत्तरत।

**उत्तर:** (क) शूद्रकः कीदृशः राजा आसीत्? **शूद्रकः महापराक्रमी नानाशास्त्रवित् पूतचरित्रः राजा आसीत्।**

(ख) वीरवरः कस्य समीपं गन्तुम् इच्छति स्म? **वीरवरः स्वामिनः (राज्ञः शूद्रकस्य) समीपं गन्तुम् इच्छति स्म।**

(ग) 'का ते सामग्री?' इति प्रश्नस्य उत्तरं वीरवरः किम् अयच्छत्? **वीरवरः 'इमौ बाहू, एष खड्गश्च' इति उत्तरम् अयच्छत्।**

(घ) वीरवरः स्वगृहं कदा गच्छति स्म? **यदा राजा स्वयम् आदिशति तदा वीरवरः स्वगृहं गच्छति स्म।**

(ङ) वीरवरः स्ववेतनस्य अर्धं केभ्यः यच्छति स्म? **वीरवरः स्ववेतनस्य अर्धं देवेभ्यः यच्छति स्म।**

(च) राजलक्ष्मीः कुत्र सुखेन अवसत्? **राजलक्ष्मीः शूद्रकस्य भुजच्छायायां सुमहता सुखेन अवसत्।**

(छ) राजलक्ष्म्याः दुःखस्य कारणं श्रुत्वा वीरवरः किम् अवदत्? **वीरवरः अवदत् – "भगवति! अस्त्यत्र कश्चिदुपायो येन भगवत्याः पुनरिह चिरवासो भवति, सुचिरं जीवति च स्वामी?"**

## 3. अन्वयरूपेण लिखत।

**उत्तर:** (क) शोभावती नाम काचन नगरी आसीत्।

(ख) देव! (मम वर्तनं) प्रतिदिनं सुवर्णशतचतुष्टयम् (अस्ति)।

(ग) देव! दिनचतुष्टयस्य वेतनार्पणेन प्रथमम् अस्य वेतनार्थिनः राजपुत्रस्य स्वरूपम् अवगम्यताम्, एतत् वेतनम् उपपन्नं किं न वा इति।

(घ) राजपुत्र! क्रन्दनम् अनुसर।

(ङ) अथ मन्त्रिणां वचनात् नरपतिना असौ राजपुत्रः वीरवरः ताम्बूलदानेन नियोजितः।

(च) एषः राजपुत्रः अस्मिन् सूचिभेद्ये तिमिरे एकाकी गन्तुं न अर्हति।

(छ) भगवति! अत्र कश्चित् उपायः अस्ति (किम्) येन भगवत्याः इह पुनः चिरवासः भवति, स्वामी च सुचिरं जीवति?

(ज) तदा राजा शूद्रकः पुनः वर्षाणां शतं जीविष्यति।

## 4. सन्धिविच्छेदः (रिक्तस्थानपूर्तिः)

| पदम् | विच्छेदः | पदम् | विच्छेदः |
|---|---|---|---|
| अथैकदा | अथ + **एकदा** | वृत्त्यर्थम् | वृत्ति + **अर्थम्** |
| कस्मादपि | **कस्मात्** + अपि | कोऽपि | कः + **अपि** |
| राजपुत्रोऽस्मि | **राजपुत्रः** + अस्मि | यथेष्टम् | यथा + **इष्टम्** |
| वेतनार्पणेन | वेतन + **अर्पणेन** | तदालोक्य | **तत्** + आलोक्य |
| ततोऽसौ | ततः + **असौ** | वर्त्तनार्थिनो | **वर्त्तन** + अर्थिनः |
| तदवशिष्टम् | **तत्** + अवशिष्टम् | राजदर्शनादनन्तरम् | राजदर्शनात् + **अनन्तरम्** |
| वेति | **वा** + इति | राजलक्ष्मीरुवाच | राजलक्ष्मीः + **उवाच** |
| चार्द्धम् | **च** + अर्धम् | बहिर्नगरादालोकिता | बहिः + **नगरात्** + आलोकिता |
| कापि | **का** + अपि | प्रत्युवाच | प्रति + **उवाच** |
| राजलक्ष्मीरस्मि | **राजलक्ष्मीः** + अस्मि | स्थास्यामीति | स्थास्यामि + **इति** |
| भुजच्छायायाम् | **भुज** + छायायाम् | अस्त्यत्र | अस्ति + **अत्र** |

SAMPLE · notesbazar.in

FREE SAMPLE | Buy the complete pack at notesbazar.in | page 5 of 6

| | | | |
|---|---|---|---|
| कश्चिदुपायो | **कश्चित्** + उपायः | | |

### 5. रेखाङ्कितपदानि केभ्यः प्रयुक्तानि?

**उत्तर:** (क) ततः असौ ... प्रचलितः → **वीरवराय** (ख) अहम् अपि गच्छामि पृष्ठतः अस्य → **वीरवराय** (ग) चिरम् एतस्य भुजच्छायायां ... → **शूद्रकाय** (घ) सा चातीव दुःसाध्या → **प्रवृत्तये (उपायाय)** (ङ) किं ते वर्तनम्? → **वीरवराय**

### 6. घटनाक्रमानुसारं लिखत।

**उत्तर:** 1. (ग) एकदा वीरवरः नाम राजपुत्रः वृत्तिं प्राप्तुं राज्ञः शूद्रकस्य समीपं गच्छति। 2. (ख) राजा प्रथमं वीरवरस्य प्रार्थनां न स्वीकरोति। 3. (ङ) राजा मन्त्रिणां मन्त्रणया वीरवराय वृत्तिं यच्छति। 4. (घ) सः (राजा) तस्य कर्तव्यनिष्ठां साक्षात् पश्यति। 5. (क) राजलक्ष्मीः वदति यत् यदि वीरवरः सर्वप्रियं वस्तु त्यजति तदा सा पुनः शूद्रकस्य समीपे स्थास्यति।

### 7. पदच्छेदं कुरुत।

**उत्तर:** (क) वृत्त्यर्थम् आगतः राजपुत्रः अस्मि।
(ख) अथ एकदा कृष्णचतुर्दश्याम् अर्धरात्रे सः राजा श्रुतवान् करुणरोदनध्वनिं कञ्चन।
(ग) तत् अहम् अपि गच्छामि पृष्ठतः अस्य निरूपयामि च किम् एतत् इति।
(घ) अस्ति अत्र कश्चित् उपायः येन भगवत्याः पुनः इह चिरवासः भवति।
(ङ) एका एव अत्र प्रवृत्तिः सा च अतीव दुःसाध्या।

## अभ्यासः (उत्तर सहित)

### प्रश्ननिर्माणम्

**उत्तर:** (क) वीरवरः वृत्त्यर्थं राजद्वारम् उपागच्छत्। → **किमर्थं**? (ख) दौवारिकः तं प्रभोः समीपम् अनयत्। → **कः**? (ग) वीरवरः दरिद्रेभ्यः ददाति। → **केभ्यः**? (घ) अर्धरात्रे राजा ध्वनिम् अशृणोत्। → **कदा**? (ङ) राजा खड्गपाणिः निरगच्छत्। → **कीदृशः**?

### प्रकृति-प्रत्ययौ

**उत्तर:** वीक्ष्य = वि + ईक्ष् + ल्यप् · श्रुत्वा = श्रु + क्त्वा · प्रणम्य = प्र + नम् + ल्यप् · निर्गतः = निर् + गम् + क्त · नियोजितः = नि + युज् (णिच्) + क्त · श्रुतवान् = श्रु + क्तवतु · गन्तुम् = गम् + तुमुन् · अनुसरन् = अनु + सृ + शतृ · आलोकिता = आ + लोक् + क्त + टाप्

### कालपरिवर्तनम् (भूतकाले)

**उत्तर:** राजा प्रतिवसति → राजा **प्रतिवसति स्म** / **प्रत्यवसत्** · वीरवरः ददाति → **अददात्** / **दत्तवान्** · सः सेवते → **असेवत** · राजा शृणोति → **अशृणोत्** / **श्रुतवान्**

### संख्या-कौशलम्

**उत्तर:** वीरवरस्य दैनिकवेतनम् = 400 स्वर्णमुद्राः। देवेभ्यः = **200**; शेषम् 200, तस्य अर्धं दरिद्रेभ्यः = **100**; पत्न्यै = **100**।

> ★ **परीक्षा-सुझावः पठत बोधत (योग्यताविस्तरः): जीमूतवाहनस्य कथा।** विदेहनगर के राजा शुद्धकेतु के पुत्र जीमूतवाहन बचपन से धर्मनिष्ठ, त्यागशील, परोपकारी थे। समुद्र-तट पर उन्हें एक अत्यन्त दुःखी वृद्ध नाग मिला; उसका दुःख दूर करने के लिए जीमूतवाहन ने अपने प्राण तक अर्पित करने का निश्चय किया। यह भी 'सन्निमित्ते वरं त्यागः' का उदाहरण है।
> **श्लोक:** कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः (यजुर्वेद 40.2): कर्म करते हुए ही सौ वर्ष जीने की इच्छा करें।

## बहुविकल्पीयप्रश्नाः: 20 MCQs

1. पाठः कस्मात् ग्रन्थात्?
   (A) रामायणात् (B) पञ्चतन्त्रात् (C) हितोपदेशात् (D) कथासरित्सागरात्

2. शूद्रकस्य नगर्याः नाम:
   (A) शोभावती (B) उज्जयिनी (C) अयोध्या (D) विदिशा

3. वीरवरस्य पत्न्याः नाम:
   (A) वीरवती (B) सर्वमङ्गला (C) शोभावती (D) वेदरता

4. वीरवरस्य पुत्रः:
   (A) वीरसेनः (B) शक्तिधरः (C) जीमूतवाहनः (D) शूद्रकः
5. वीरवरः प्रतिदिनं कति स्वर्णमुद्राः अयाचत?
   (A) शतम् (B) चतुश्शतम् (C) सहस्रम् (D) चत्वारि
6. 'का ते सामग्री?' – उत्तरम्:
   (A) अश्वः रथः च (B) सेना (C) धनुः बाणः च (D) इमौ बाहू एष खड्गश्च
7. वीरवरः कस्य वचनात् नियोजितः?
   (A) मन्त्रिणाम् (B) पत्न्याः (C) राज्ञ्याः (D) दौवारिकस्य
8. वीरवरः वेतनस्य अर्धं केभ्यः ददाति?
   (A) दरिद्रेभ्यः (B) पत्न्यै (C) देवेभ्यः (D) राज्ञे
9. रोदनध्वनिः कदा श्रुतः?
   (A) पूर्णिमायाम् (B) प्रभाते (C) मध्याह्ने (D) कृष्णचतुर्दश्याम् अर्धरात्रे
10. रोदनपरा नारी का आसीत्?
   (A) वेदरता (B) राजलक्ष्मीः (C) वीरवती (D) राज्ञी
11. राजलक्ष्म्यनुसारं राजा कदा पञ्चत्वं यास्यति?
   (A) अद्य (B) श्वः (C) तृतीये दिवसे (D) वर्षान्ते
12. उपहारः कस्यै देयः?
   (A) सर्वमङ्गलायै (B) राज्ञ्यै (C) वेदरतायै (D) राजलक्ष्म्यै
13. 'पञ्चत्वं याति' इत्यस्य अर्थः:
   (A) पञ्चवर्षीयः भवति (B) म्रियते (C) गच्छति (D) जयति
14. 'सूचिभेद्ये तिमिरे' – अर्थः:
   (A) अल्पे (B) प्रकाशे (C) घने अन्धकारे (D) सन्ध्यायाम्
15. 'प्रतिवसति स्म' – कालः:
   (A) वर्तमानः (B) भविष्यत् (C) आज्ञा (D) भूतः
16. 'वेति' = ?
   (A) वा + इति (B) व + इति (C) वे + इति (D) वेत् + इ
17. 'प्रतिहारः' इत्यस्य पर्यायः:
   (A) दौवारिकः (B) मन्त्री (C) सेनापतिः (D) राजा
18. 'वीक्ष्य' अत्र प्रत्ययः:
   (A) क्त्वा (B) क्त (C) तुमुन् (D) ल्यप्
19. 'श्रुतवान्' अत्र प्रत्ययः:
   (A) क्त (B) क्तवतु (C) शतृ (D) तव्यत्
20. राजा वीरवरम् अनुसृत्य कीदृशः निरगच्छत्?
   (A) सेनया सह (B) अश्वारूढः (C) खड्गपाणिः (D) निःशस्त्रः

1 (C) · 2 (A) · 3 (D) · 4 (B) · 5 (B) · 6 (D) · 7 (A) · 8 (C) · 9 (D) · 10 (B) · 11 (C) · 12 (A) · 13 (B) · 14 (C) · 15 (D) · 16 (A) · 17 (A) · 18 (D) · 19 (B) · 20 (C)

## कथन-कारण (6)

(A) दोनों सही, कारण सही व्याख्या। (B) दोनों सही, कारण सही व्याख्या नहीं। (C) कथन सही, कारण गलत। (D) कथन गलत, कारण सही।

1. कथन: राजा तलवार लेकर वीरवर के पीछे गए। कारण: घने अँधेरे में राजपुत्र का अकेले जाना उचित नहीं था।
2. कथन: राजलक्ष्मी रो रही थी। कारण: तीसरे दिन राजा की मृत्यु होने पर वह अनाथ हो जाती।
3. कथन: राजा ने वीरवर को देखते ही नियुक्त कर दिया। कारण: मन्त्री ने चार दिन का वेतन देकर परखने की सलाह दी।
4. कथन: वीरवर पूरा वेतन पत्नी को देता था। कारण: वह वेतन का आधा देवताओं को देता था।
5. कथन: 'निर्गतः' भूतकाल का रूप है। कारण: क्त प्रत्यय से भूतकाल का भाव प्रकट होता है।
6. कथन: वीरवर ने राजलक्ष्मी को 'अम्ब' कहा। कारण: संस्कृत में पदक्रम मुक्त होता है।

उत्तर: 1 (A) · 2 (A) · 3 (D) · 4 (D) · 5 (A) · 6 (B)

## अंतिम-रात सारांश

- हितोपदेश की कथा: शोभावती के राजा शूद्रक; राजपुत्र वीरवर (पत्नी वेदरता, पुत्र शक्तिधर, कन्या वीरवती)।
- वेतन 400 स्वर्णमुद्राएँ; साधन: दो भुजाएँ और तलवार; मन्त्री की सलाह से नियुक्ति।
- वेतन-विभाग: ½ देव, ¼ दरिद्र, ¼ पत्नी; दिन-रात राजद्वार पर सेवा।
- अर्धरात्रि में रोती राजलक्ष्मी: तीसरे दिन राजा की मृत्यु; उपाय: सबसे प्रिय वस्तु सर्वमङ्गला को अर्पण।
- व्याकरण: मुक्त पदक्रम; भूतकाल: लङ्, लट् + स्म, क्तवतु, क्त।

SAMPLE · notesbazar.in